# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – -२०२१

| | | |
|---|---|---|
| कक्षा – आचार्य-२ | प्रश्नपत्रम् – ४ | गुणाः – ५० |
| विषयः – स्वामिनारायणवेदान्तः(S) | सत्रम् – ४ | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १६/०७/२०२१ | सन्दर्भग्रन्थः – भद्रेशस्वामिविरचितबृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम् | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु सूत्रद्वयं व्याख्यायत।**

१ द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यं चामृतं च स्थितं च सच्च त्यच्च।

२ स होवाच याज्ञवल्क्यः प्रिया बतारे नः सती प्रियं भाषस एह्यास्स्व व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यायसस्वेति ब्रवीतु मे भगवानिति।

३ प्राणो वै ग्रहः सोऽपानेनातिग्रहेण गृहीतोऽपानेन हि गन्धान् जिघ्रति।

४ याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते किमेनं न जहातीति नामेत्यनन्तं वै नामानन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति।

**प्रश्नः २ निबन्धात्मकोत्तरं लिखत।**

अजातशत्रोरुपदेशः

**प्रश्नः ३ निबन्धात्मकोत्तरं लिखत।**

याज्ञवल्क्य–मैत्रेयी संवादे परमात्ममहिमा।

**प्रश्नः ४ निबन्धात्मकोत्तरं लिखत।**

याज्ञवल्क्य–जारत्कारवसंवादः।

**प्रश्नः ५ निबन्धात्मकोत्तरं लिखत।**

कहोलब्राह्मणम्।

**प्रश्नः ६ अधोलिखितेषु सूत्रद्वयं व्याख्यायत।**

१ यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः।

२ सा होवाच नमस्तेऽस्तु याज्ञवल्क्य यो म एतं व्यवोचोऽपरस्मै धारयस्वेति पृच्छ गार्गीति।

३ इन्धो ह वै नामैष योऽयं दक्षिणोऽक्षन्पुरुषस्तं वा एतमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेणैव परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः।

४ स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः पाप्मभिः संसृज्यते स उत्क्रामन्म्रियमाणः पाप्मनो विजहाति।

**प्रश्नः ७ निबन्धात्मकोत्तरं लिखत।**

अक्षरब्रह्मप्रशासनं तद्विज्ञानेन फलं च।

**प्रश्नः ८ निबन्धात्मकोत्तरं लिखत।**

याज्ञवल्क्य जनकसंवादे ब्रह्मैक्यानुसन्धानप्रकारः।

**प्रश्नः ९ निबन्धात्मकोत्तरं लिखत।**

प्रत्यगात्मनः उत्क्रमणप्रकारः कर्मफलं च।

**प्रश्नः१० निबन्धात्मकोत्तरं लिखत।**

मुक्त्यवस्थावर्णनम्।

**प्रश्नः११ केषाञ्चन दशानामतिलघूत्तराणि देयानि।**

१ किं स्मृतिप्रस्थानमुच्यते?

२ मुख्योपनिषदः कति?

३ बृहदारण्यकोपनिषत् केन वेदेन सम्बद्धा?

४ बृहदारण्यकोपनिषदि कति अध्यायाः सन्ति?

५ दिगधिष्ठातारौ कौ?

६ बालाकिना सह कः संवादं करोति?

७ लूतानामा कीटविशेषः कः?

८ चम्यते अनेन इति कः?

९ का मैत्रेयी?

१० स्वामिनारायणतत्त्वज्ञाने कति नित्यतत्त्वानि सन्ति?

११ 'स्तनयित्नुः' अर्थात्?

१२ शब्दस्य अन्तर्यामी कः?

१३ मनसः अधिष्ठाता कः?

१४ चाक्रायणः कः?

१५ स्वामिनारायणभाष्यकृत् कः?

***